International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(5): 136-138
© 2025 IJMH
www.themultijournal.com

Received: 13-10-2025
Accepted: 25-10-2025
Publish : 28-10-2025

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# शब्दब्रह्मणि निष्णान्तः परंब्रह्माधिगच्छति

**Dr. Markanda Nayak**

विष्टपेऽस्मिन् युगे युगे व्याकरणशास्त्रस्य an केवलं प्रक्रियासिद्धत्वमपि तु दर्शनशास्त्रत्वमपि वरीवृत्यते। द्वादशदर्शनानामालोडनेन उपनिषदाञ्च अन्वेषणेन यद्दार्शनिकतत्त्वं निःसरति तदेव दार्शनिकतत्त्वमध्यात्मव्याकरणशास्त्रेऽस्मिन् वरीवर्ति। अस्मिन् भारतवर्षे अध्यात्मशास्त्रादृते अन्यस्य शास्त्रत्वं नाङ्गीक्रियते। अतः भारतीयशास्त्रपरम्परायामध्यात्मिकविद्यायाः महन्महत्त्वं वरिवर्ति। तादृशविद्यायाः चिन्तनमननपराकाष्ठा अनुभवसिद्धा। धर्मश्च तस्याः शाश्वतिकः। अतः जगदिदं किं पारमार्थिकं सत्यम्। कस्य परिणामो विवर्तो वेति दार्शनिकविचारजातमभिलक्ष्य तार्किकमीमांसकवेदान्तिप्रभृतिभिः सुधिभिः स्व-स्व-सिद्धान्ताभिनिवेशेन बहवो ग्रन्थाः ग्रथिताः। सुकुमारमतिपरोपकारैकपरा आलङ्कारिका अपि तमेव मार्गमनुसृत्य रसस्य ब्रह्मानन्दोसहदरत्वं ब्रह्मानन्दस्वरूपकत्वं वा समर्थ्यमाना बलात् स्वल्पमपि दर्शनशास्त्रविषयं स्वशास्त्रे प्राविशन्। दार्शनिकविषयनिरूपणं विना व्याकरणशास्त्रस्य तादृशी प्रतिष्ठा न स्यात्, यादृशी अभिप्रेता आसीत्। अतः व्याकरणशास्त्रेऽपि दर्शनशास्त्रविषयश्चासीत् । भारतीयसंस्कृतेः आदिमग्रन्थे ऋग्वेदे वाचः स्वरूपविषये शब्दस्य नित्यत्वविषये च चर्चा विहिता यथा- वाचा विरूपनित्यया । अथर्ववेदेऽपि वाचः वर्णनं प्राप्यते । यथा वाचमिव वक्तरि । आचार्ययास्केनापि शब्दस्य व्याप्तिमता स्वीकृता । वाप्तिमत्त्वात् तु शब्दस्य (निरुक्तम्)। पाणिनेः पूर्ववर्तिवैयाकरणः स्फोटायनः स्फोटसिद्धान्तस्य प्रचारकरूपेण प्रसिद्धः। पदमञ्जरीकारेण स्पष्टं प्रतिपादितं यत् स्फोटः अयनं पारायणं यस्य सः स्फोटायनः स्फोटप्रतिपादनपरवैयाकणाचार्यः इति । आचार्यव्याडिः स्वकीये संग्रहग्रन्थे दार्शनिकचिन्तनानां संग्रहं च करोति इति परवर्तिग्रन्थकाराणां मतम् । महर्षिपाणिनिना स्वकीयेऽष्टाध्यायीग्रन्थे शब्दार्थादिविषयाः सूत्ररूपेण प्रतिपादिताः। अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, अवङ् स्फोटायनस्य इत्यादिसूत्राणामालोडनेन तत् ज्ञायते । वचोऽशब्दसंज्ञायाम् इत्यनेन ज्ञायते यत् शब्दरूपार्थे वाक्यशब्दः कुत्वघटितः । आचार्यकात्यायनेन सिद्धे शब्दार्थसम्बन्धे इति सूत्रे व्याकरणदर्शनस्य सूक्ष्मरूपं उद्घाटितम् । महर्षिपतञ्जलिना पश्पशाह्निके व्याकरणस्य दार्शनिकरूपं स्फुटमभिव्यक्तम् । अतः पश्पशारहिता शब्दविद्या न शोभते इति वदन्ति वैयाकरणाः। आचार्यभर्तृहरिणापि वाक्यपदीये व्याकरणदर्शनस्य तत्त्वानि सम्यक्तया प्रतिपादितानि। कालान्तरे अनेके विद्वांसः व्याकरणदर्शनस्योपरि चर्चा कृता। शब्दानुशासनमेव व्याकरणशास्त्रस्य मुख्यं प्रयोजनम्। परन्तु यदा व्याकरणशास्त्रस्य दृष्टिः शब्दतत्त्वचिन्तने पदार्थनिरूपणे च प्रवर्तते तदा शास्त्रमिदं दर्शनशास्त्ररूपेण परिणमते । वैयाकरणानां मते सकलजगतः मूलमेव शब्दब्रह्म । तस्मात् विवर्त्तितेयं जगतः प्रक्रिया । तदेव स्फोटात्मकं शब्दब्रह्म। शब्दब्रह्मणः ज्ञानात् दुःखनिवृत्तिरूपा मुक्तिः लभ्यते । उपनिषदि शब्दस्य ब्रह्मत्वमुक्तम् वाग् वै ब्रह्म ।[१] किञ्च शतपथब्रह्मणेऽपि ते मृत्युमति वर्तन्ते ये वै वाचमुपासते। वागेव विश्वा भुवनानि जज्ञे। दर्शनशब्दोऽयं भावसाधनः करणसाधनञ्च इति उभयार्थे दृश्यते। भावसाधनत्वे दृष्टिरित्यर्थः। दृष्टिर्नाम विशेषासाधारणं दिव्या दृष्टिः । दिव्यदृष्ट्या अनिर्वचनीयस्य परंब्रह्मणः दर्शनं सायुज्यं भवतीति दर्शनशब्दस्यार्थः । वैदिकैः ऋषिभिः प्रप्रथमं दिव्यदर्शनमुपलब्धम् । यथोक्तम् - तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।[२]

गतिशीलस्य जगतः नियमकं ध्रुवमविचाल्यनपायोपजनाविकारि-मूलभूतं कूटस्थं किञ्चित् तत्त्वमस्ति, तदेव ब्रह्म। तदेव जगतः विवर्तोपादानम्। वैयाकरणैः शब्दब्रह्म स्वीक्रियते। निर्विकल्पकं सविकल्पकं वा ज्ञानं गौः, शुक्ल इति शब्दविशिष्टमर्थमवबोधयति। शब्दाख्यविशेषणानुरक्तस्य तस्य विशेषस्य स्वरूपं शब्देनैव ज्ञायते। शब्दे एव अर्थोपारूढः प्रतिभाति। महाभाष्यकृता चत्वारि शृङ्गा इत्यादिमन्त्रस्य व्याख्यानावसरे महान् देवः शब्दः, तेन नः साम्यं यथा स्यादत्यध्येयं व्याकरणमित्युक्तम्।[३] अत्र महान् ब्रह्मस्वरूपः देवः अन्तर्यामीरूपः साम्यं सायुज्यमिति व्याख्यानं टीकाकारैः। इत एव शब्दब्रह्मता निर्धारिता भर्तृहरिणा। ब्रह्मकाण्डस्य प्रथमश्लोके शब्दब्रह्मणोऽर्थरूपेण विवर्तनं प्रतिपादितं तेन । शब्दब्रह्मणो विचारः महाभारते श्रीमद्भागवते श्रीमद्भगवीतायाम् अपि दृश्यते। यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, तं प्रयन्त्यभिसंविशन्ति इति श्रुतिवचनेन ब्रह्मणः जगत् कर्त्तृत्वं पालयितृत्वं , संहर्तृत्वं च प्रतिपाद्यते । वागेव विश्वा भुवनानि जज्ञे। इत्येषा श्रुतिः वाचः भुवनकर्तृत्वं प्रतिपादयति। जज्ञे इत्यस्यात्रान्तर्भावितत्वेन जनितवतीत्यर्थः। कालस्याविवक्षया जनयति इत्यर्थो वा। वागेवेदं बुभुजे, इत्येषा श्रुतिः वाचः भुवनपालकत्वं संहारकत्वं च प्रतिपादयति । भुज पालाभ्यवहारयोः इति स्वरसात् । अतः वाक्तत्त्वस्यापि ब्रह्मरूपता समागता । तस्यां च चिद्रूपता सुतरां निश्चीयते । सच्चिदानन्दं ब्रह्म इत्यादिश्रुतिजाते ब्रह्मणः चिद्रूपत्वं संकीर्तितम् । सृष्टिरियं शब्दब्रह्मपूर्विका । अत एव मनुना वेदशब्देभ्यः एवादौ पृथक् संस्थाश्च निर्ममे इत्युक्तम् । वादरायणेनापि शब्द इति चेन्नातः प्रभवान् इति दर्शितम् । अतः वेदशब्देभ्यो जगतः सृष्टत्वात् शब्दस्य ब्रह्मत्वं सिद्धम् । शब्दात् सृष्टिस्तु शङ्कराचार्योऽपि मन्यते। परन्तु अस्योपादानत्वं नाङ्गीकरोति। भर्तृहरिस्तु शब्दस्यैवोपादानत्वं मन्यते इति तयोः भेदः। शब्दब्रह्मणो जगत्सृष्टौ कालापेक्षा दर्शिता भर्तृहरिणा। किन्तु वेदान्ते परमेश्वरस्य सृष्टौ कर्मापेक्षा प्रदर्शिता इत्यपि अनयोः भेदः। शब्दब्रह्मणः स्वरूपविषये भर्तृहरिनागेशयोरपि मतभेदो दृश्यते। भर्तृहरिणा नित्यं शब्दब्रह्मशब्दभावेन विवृत्तं तदर्थभावेन विवर्तते इति अनादिनि-धनमिति कारिकया वदता तस्यैव सर्वजगदुपादानत्वं कूटस्थं नित्यत्वञ्च अङ्गीक्रियते। नागेशेन अनादिनिधनमिति शब्दब्रह्मणो नित्यतोक्तिः यावत् सृष्टिस्थित्या व्यवहारनित्यतया वा स्वीक्रियते। एवञ्च एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य सर्वशब्दतदर्थोभयो-पादनतत्वेन उभयरूपतया उभयोरपि तत्कार्ययोः उभयरूपत्वं स्वीकृतम्। तन्त्रशास्त्रमनुसृत्य नागेशेनेदमुक्तम्। सूतसंहितायां प्रणवो द्विविधः कल्पितः । परोऽपरश्च । परो ब्रह्मात्मकः अपरः शब्दात्मकः। सत्यं ज्ञानम् आनन्दं ब्रह्म इत्यादि श्रुत्युक्तं ब्रह्म ज्ञानानन्दादिरूपम्। यथा प्रकर्षेण नवम् – निखिलविकाररहिततया कूटस्थं तथा प्रकर्षेण नवः तत्प्राप्तिरूपः यस्मादिति विग्रहबलेन शब्दोऽपि प्रणव इत्युच्यते। द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत् । शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति।[४] इति अत्र द्विविधं ब्रह्म स्वीक्रियते । भर्तृहरिणा श्रुतिभाषाविज्ञानादिग्रन्थानाधारीकृत्य वाचः तत्त्वमुद्घाटितम् । तस्य मते ज्ञानस्य हि तथैव वाक्रूपत्वं यथा प्रकाशकत्वम् अग्नेः स्वरूपम्, चैतन्यम् अन्तर्यामिणः स्वरूपम्। यदि प्रकाशकस्य प्रकाशकत्व-मुत्सीदेत् चैतन्यमतानुयायिनः तर्हि प्रकाशोऽन्तर्यामी च नैव भवेताम्। एवञ्च ज्ञानस्य वनस्थस्य नकारस्य णत्वं विधीयते इति। उदाहरणं यथा

वाग्रूपतायामुत्क्रान्ताणां ज्ञानमपि न भवेत् । सकलमपि ज्ञानं सूक्ष्मया वाग्रूपतया स्थूलशब्दस्योपादानभूतया अनुगतम् । अत एव वाक्रूपता ज्ञानस्य शाश्वतधर्मः । प्रकाशितस्य ज्ञानस्य चावधारिका वाक् ।

**वाग्रूपता चेदुत्क्रामेदवबाधस्य शाश्वती ।**
**न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी ।।**[५]

भर्तृहरिमतेन वाक् त्रिविधा- पश्यन्ती, मध्यमा, वैखरी चेति। पश्यन्ती वाक् एव जगदुत्पादयति । सैव पराशब्देनाप्युच्यते । सैव च शब्दब्रह्म। सा च त्रिकालाबाध्यत्वरूपा नित्या । इदं शब्दब्रह्म वेदान्तवेद्यब्रह्मतः अभिन्नम् । यद्यपि वाक्यपदीये पश्यन्ती-मध्यमा-वैखरीणां विवेचनं प्रतिपदोक्तं प्राप्यते, तथापि अत्रातीतविपर्यासः केवलामुपश्यति इत्यत्र केवला पदप्रयोगेण परावाचः संकेतः प्राप्यते। अथवा सूक्ष्मपश्यन्तीरूपेण शब्दब्रह्मणः निर्देशः कृतः स्यात् । नागेशेन वाचः चातुर्विध्यं स्वीकृतम् । एवञ्च शब्दब्रह्म स्वशब्देन पराशब्देन चोत्यते । प्रपञ्चसारतन्त्रे उक्तम् – विन्दोः तस्मात् भिद्यमानाद् रवोऽव्यक्तात्मकोऽभवत् । स एव श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते। परावाक् स्फोटशब्देन उच्यते । सैव शब्दब्रह्मेति कृष्णमिश्रेणोक्तम्।

दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः। अश्रद्धा मनुते दद्याच्छ्रद्धां सत्ये प्रजापतिः ।।६ अनेन ज्ञायते यजुर्वेदे व्याकरणस्य दर्शनत्वं प्रतिपादितमस्ति। अत्र सत्यासत्यविवेचनं लक्षणं दर्शनत्वं लभ्यते । तत्र उपाधिभूतो व्यञ्जको ध्वनिरसत्यः । स्फोटाख्यः शब्दब्रह्म सत्यम् । किञ्च पश्यन्त्यादिकं सर्वं जगदसत्यम्। तदुपादानभूतं पराख्यं ब्रह्म सत्यम्। जगत्सृष्टेः परमकारणभूता अनादिपरात्पराशक्तिः शब्दतत्त्वात्मिका । शब्दब्रह्मणः स्वरूपमुपनिषदि इत्थं लभ्यते । तथा हि –

**द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।**
**शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति ।।**[७]

श्लोकोऽयं महाभारतस्य शान्तिपर्वणि पठितः। महाभारतेऽपि अनादिनिधनानित्या वागुत्सृष्टा स्वयं भुवा। इति वाचः

अनादिनिधनत्वमभिहितम् । अनेन ज्ञायते यत् शब्दतत्त्वस्य ब्रह्मणः स्फोटायनस्य वा तत्त्वस्य साक्षादुपकारः व्याख्याकरणेन एव लभ्यते। सूक्ष्मातिसूक्ष्मभूतः शब्दः एव प्राणिनां चेतना आन्तरज्ञानं च भवति। तदेव सूक्ष्मवागात्मा सृष्टिप्रपञ्चस्य मूले विद्यमानं शब्दब्रह्म, तस्य स्थूलरूपेण सम्पूर्णं सृष्टिप्रपञ्चं रचयामास । यथा वृक्षस्य मूले विद्यमानं सूक्ष्मं बीजं स्थूलरूपेण परिणमते।

ब्रह्मणः शब्दतत्त्वात् जगतः प्रक्रिया उत्पद्यते। सर्वविकाराणां प्रलये वर्णमात्रा पदार्थानुपूर्वि शून्यमुपसंहृतक्रमं शब्दाख्यब्रह्म अवतिष्ठते, सेयं ब्रह्मणः अवस्था संवर्त इत्युच्यते। प्रलये पदार्थानां नास्ति परस्परं भेदेन अवधारणम्। अतः तदानींकृतमव्याकृतं वा ब्रह्म उच्यते। शब्दब्रह्मणस्सार्वत्रिकसत्तायाः प्रतिपादनाय वैयाकरणैः बहुप्रक्रिया-ङ्कल्पना कृता। प्रकृतिप्रत्ययविभागोऽस्याः परिणामो भवति। एतदाश्चर्यम्भवति यैर्वैयाकरणैश्शब्दस्याखण्डत्वमविच्छेद्यत्वन्नित्य-त्वञ्च प्रतिपादितम्। तैश्शब्दतत्त्वस्य स्वरूपाधिगमदृष्ट्या शब्दानां सूक्ष्मातिसूक्ष्मविभागः कृतः। परन्तु सर्वेषामसत्यविभागानाङ्कल्पनं या सत्यस्वरूपस्य महतश्शब्दस्य सान्निध्यप्राप्तिस्तस्य सततमनु-भवस्स्वस्यात्मतत्वादि-भिन्नत्वबोध आसीच्छाब्दिकानाम्परमलक्ष्यम्।

भवत्येतदेव वैयाकरणानां शब्दाद्वैतवादः। अद्वैततत्त्वरूपस्य शब्दब्रह्मणो रहस्यभूतस्वरूपज्ञानम्भवति मुक्तिः। अत एव व्याकरणहेतुकस्य शब्दसंस्कारस्य धर्मविशेषजनकद्वारा ज्ञानोत्पत्ति-क्रमेण शब्दस्य परम्ब्रह्मप्राप्त्युपायत्वम्भर्तृहरिणा प्रतिपादितम्। तया अइउण् प्रभृतीनि चतुर्दशसूत्राणि समुपलब्धानि। नन्दिकेश्वर-कृतकारिकायान्तद्व्याख्याने सूत्राणां यादृशविवरणमुपलभ्यते, तेन व्याकरणस्याध्यात्मिकी शास्त्रता सारल्येनैव सिध्यति। तथा ह्यत्रोच्यते –

**अकारो ब्रह्मस्वरूपस्थान् निर्गुणः सर्ववस्तुषु ।**
**चित्कलाभिः समाश्रित्य जगद्रूपः उणीश्वरः ।।**[८]

अस्याः कारिकायाः व्याख्यानावसरे उपमन्युराचार्यो व्याकरणदर्शन-स्वरूपम्प्रतिपादयति। तद्यथा अ इति परमेश्वरः, निर्गुणः। इं मायामाश्रित्य उः व्यापकः सगुणः ईश्वरः आसीदिति सूचितः।

एवमन्यासु सर्वासु कारिकासु तैर्व्याावत्तरणाध्यात्मिकसिद्धान्त-स्सत्यनुरपतयोपस्थापितः। किञ्च पाणिनीयसम्प्रदाये एषा जनश्रुतिः यत् सनकादिसिद्धपुरुषानुद्धर्तुं पाणिनये व्याकरणसूत्रन्दर्शयितुं ढक्कानिनादेन भगवान् शिवः प्रत्याहरसूत्राण्युपदिदेश। अनेन प्रतीयते यत् पाणिनिसूत्राणामध्ययनेन मोक्षमाप्नोति पुरुषः। एवं प्रकारेण ब्रह्मणः सिद्धान्तः पाणिनीयव्याकरणयुपस्थापितः। शब्दब्रह्मणैव परब्रह्म प्राप्तिर्भवतीति वैयाकरणानां मूर्धन्यः राधान्तोऽस्ति ।

**पादटिप्पनी-**

१.बृ.आ.उ
२.शु.य
३.म.प.आ.
४.मै.उ
५.व्या.शा.इ
६.वा.प.अ.टी
७.म.भा.भी.प
८.बृ.आ.उ